# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – जुलाई - २०२१

| | | |
|---|---|---|
| **कक्षा – आचार्य – २** | **प्रश्नपत्रम् – ५** | **गुणाः – ५०** |
| **विषयः – वेदः** | **सत्रम् – ४** | **समयः – १० तः १२** |
| **दिनाङ्कः – १७/०७/२०२१** | **सन्दर्भग्रन्थः – निरुक्तम्** | |

**सूचना - निम्नलिखितेषु एकादशप्रश्नेषु केचन पञ्चप्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ अधोलिखितेषु द्वयोः व्याख्या कार्या।**

१ समाम्नायः समाम्नातः। स व्याख्यातव्यः।
२ न निर्बुद्धा उपसर्गा अर्थान्निराहुरीति शाकटायनः।
३ उच्चावचेष्वर्थेषु निपतन्ति।
४ नु इत्येषोऽनेककर्मा।

**प्रश्नः २** निरुक्तस्य प्रथमाध्यायस्य तृतीयपादस्य विषयवस्तु प्रस्तूयताम्।

**प्रश्नः ३** पादपूरणे निपातानां योगदानं विवेचयत।

**प्रश्नः ४** 'अनेकार्था हि मन्त्राः' इति कौत्सस्य मतं प्रतिपादयत।

**प्रश्नः ५** निरुक्तस्य प्रथमाध्यायस्य चतुर्थपादस्य विषयवस्तु प्रस्तूयताम्।

**प्रश्नः ६ अधोलिखितेषु द्वयोः व्याख्या कार्या।**
१ अथ चेत् सर्वाणि आख्यातजानि नामानि स्युः।
२ अथापि निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति।
३ पदप्रकृतिः संहिता।
४ अथापि ज्ञानप्रशंसा भवति अज्ञाननिन्दा च।

**प्रश्नः ७** अर्थज्ञानस्य प्रशंसाविषये एकं निबन्धं लिखत।

**प्रश्नः ८** 'अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते' इत्यस्य वाक्यस्य विशदवर्णनं कुरुत।

**प्रश्नः ९** निरुक्तग्रन्थानुसारं वर्ज्यशिष्य ग्राह्यशिष्याणां निरूपणं कुरुत ।

**प्रश्नः १०** निरुक्तानुसारं नैघण्टुकाण्डस्य वैशिष्ट्यं प्रतिपादयत ।

**प्रश्नः ११ दशानां प्रश्नानां लघूत्तराणि लिखत ।**

१ निरुक्तानुसारं संहितायाः लक्षणं किम् ?
२ 'अदितिः सर्वम्' इत्यस्य किमस्ति उदाहरणम् ?
३ 'इन्द्रियनित्यं वचनम्' इति कस्य मतम् ?
४ व्याकरणस्य कात्स्न्र्यं किमस्ति ?
५ कः जाते जाते विद्यां वदति ?
६ कति भावविकाराः ?
७ निरुक्तस्य प्रथमकाण्डस्य नाम किम् ?
८ तृतीयभावविकारः कः ?
९ आख्यातम् इत्युक्ते किम् ?
१० अन्तलोपस्य उदाहरणं किम् ?
११ निरुक्तस्य द्वितीयकाण्डस्य नाम किम् ?
१२ निपातस्य लक्षणं किम् ?
१३ निरुक्तानुसारं कति उपसर्गाः ?
१४ निरुक्तस्य कर्ता कः ?
१५ पदजातानि कानि ?

****